कक्षा
9

# व्याकरणकौमुदी

## ( प्रथमो भागः )

**प्रवेशिका**

**संस्कृत प्रथमपत्रम्**

व्याकरणकौमुदी ( प्रथमो भागः )
कक्षा 9

# व्याकरणकौमुदी (प्रथमो भागः)

## कक्षा-9 (प्रवेशिका)

## संस्कृत प्रथमपत्रम्

माध्यमिक-शिक्षा-बोर्ड, राजस्थानम्, अजमेरम्

# पाठ्य–पुस्तक–निर्माण–समितिः

**पुस्तकम्** – व्याकरणकौमुदी (प्रथमो भागः)
कक्षा–9 (प्रवेशिका)


**संयोजकः** – डॉ. महावीरप्रसाद सारस्वतः, (प्रो. व्याकरणशास्त्रम्)
श्रीगंगा–शार्दूल–राजकीय–आचार्य–संस्कृत–महाविद्यालयः, बीकानेरम्

**लेखकः** – 1. डॉ. राजेन्द्रप्रसाद भट्टः, (प्राचार्यः)
राजकीय–शास्त्री–संस्कृत–महाविद्यालयः, पीठम् (डूंगरपुरम्)

# पाठ्यक्रम–निर्माण–समितिः

**संस्कृतवाङ्मयादर्शः (प्रथमो भागः)**
**कनिष्ठोपाध्याय-कक्षायै स्वीकृतं पाठ्यपुस्तकम्**

संयोजक– श्री विमल कुमार जैन (आई.ए.एस.)
निदेशक संस्कृत शिक्षा, राजस्थान, जयपुर

सदस्य–
1. श्री बहादुर सिंह गुर्जर
   सहायक–निदेशक, संस्कृत–शिक्षा, राजस्थान, जयपुर

2. डॉ. नाथूलाल सुमन, पूर्व–संयुक्तसचिव
   उच्च–शिक्षा, शासन–सचिवालय, जयपुर

3. श्री योगेन्द्र धामा, व्याख्याता
   राजकीय महाविद्यालय, अलवर

4. डॉ. हरिसिंह राजपुरोहित, व्याख्याता,
   राजकीय महाविद्यालय, ओसियां, जोधपुर

5. श्री हरिओम गौतम
   संभागीय–संस्कृत–शिक्षाधिकारी, भरतपुर–संभाग, भरतपुर

6. श्री रामावतार सिंह, प्रधानाध्यापक,
   राजकीय आदर्श प्रवेशिका संस्कृत विद्यालय, धौलपुर

7. श्री प्रदीप कुमार भट्ट, प्रधानाध्यापक,
   राजकीय आदर्श प्रवेशिका संस्कृत विद्यालय, डूंगरपुर

8. श्री महेशचन्द्र शर्मा, प्राध्यापक
   राजकीय वरिष्ठ उपाध्याय संस्कृत विद्यालय
   कुण्डगेट सावर, अजमेर

## – प्रास्ताविकम् –

सर्वशास्त्रोपयोगि व्याकरणशास्त्रम्। संस्कृतभाषायां पाणिनीयं व्याकरणं सर्वातिशायि वर्तते इति सर्वेषामैकमत्यम्। व्याकरणं हि वेदाङ्गेषु मुख्यतमं मुखस्थानीयं वर्तते 'मुखं व्याकरणं स्मृतम्' इति। तत्र पाणिनीयव्याकरणमेव लौकिकानां वैदिकानाञ्च उभयविधशब्दानां व्युत्पादकत्वात् वेदाङ्गत्वं भजते। पाणिनिसूत्राणि आधारीकृत्य लिखितैः कात्यायनवार्तिकैः महर्षेः पतञ्जलेः महाभाष्येण च संवलितमिदं त्रिमुनिव्याकरणम् इत्युच्यते। व्याकरणस्यैव अपरं नाम 'शब्दानुशासनम्' वर्तते, यतो हि शब्दविषयकमनुशासनमेवास्य साक्षात् प्रयोजनम्। अतः व्याकरणस्य महत्त्वं भाषायाम् असन्दिग्धम्। बहुकालं यावत् अष्टाध्यायीक्रमानुसारं व्याकरणस्याध्ययनमध्यापनं प्राचलत् सम्प्रत्यपि चलति। तत्र परम्परायामेव भट्टोजिदीक्षितः यथाप्रसङ्गं, यथावश्यकतं पाणिनेः सूत्राणां क्रमं परिवृत्य, तेषां वृत्तिं विलिख्य, उदाहरणानि च प्रस्तुत्य 'वैयाकरणसिद्धान्तकौमुदी' इति नामानं प्रक्रियाग्रन्थं रचितवान्। अयं अभिनवः पन्थाः आसीत्, आदृतश्च पदवाक्यप्रमाणप्रमाणैः विद्वद्भिः। वरदराजाचार्यः तमेव ग्रन्थं संक्षिप्य 'मध्यसिद्धान्तकौमुदी' रूपेण व्यलिखत्। तत्रापि सुकुमारमतीनां बालानां सारल्येन पाणिनीयव्याकरणे प्रवेशो यथा स्यात् तथा कर्तुं वरदराजः ''लघुसिद्धान्तकौमुदी'' इति ग्रन्थं कृतवान्। इमं च 'लघुकौमुदी' ग्रन्थं 'व्याकरणप्रवेशद्वारम्' इत्यभिधातुं शक्यते।

यद्यप्यत्र लघुसिद्धान्तकौमुद्यां नास्त्यतिकाठिन्यं तथापि बालानामुपकाराय सरहस्यमवगत्यर्थं सरलं व्याख्यानं टिप्पणं वा अपेक्ष्यत एव। अतः राजस्थानमाध्यमिकशिक्षामण्डलस्यानुरोधेन प्रवेशिकाप्रथमवर्षकक्षायाः छात्राणां कृते व्याकरणप्रश्नपत्राय यथापाठ्यक्रमं पञ्चसन्धिपर्यन्तं छात्राणां स्तरानुकूलं संस्कृते टीकनं कृतमावाभ्याम्। अत्र आवश्यकानां पारिभाषिकशब्दानां व्याकरणस्य वैयाकरणानाञ्चापि परिचयः प्रदत्तः। वैयाकरणसिद्धान्तकौमुदीगतानां कारकप्रकरणसम्बद्धानां सप्तविंशतिसूत्राणामपि अत्र पुस्तके सटिप्पणं सम्पादनं कृतमस्ति। प्रतिपृष्ठमङ्कितरेखातः उपरि ग्रन्थस्य मूलरूपम् अधोभागे च व्याख्यानमस्ति इति ज्ञेयम्। संस्कृतसंभाषणे लेखने अनुवादे च छात्राणां गतिर्भवेदेतदर्थं राजस्थानमाध्यमिकशिक्षामण्डलस्यादेशेन एच.आर. विश्वासेन लिखितम् –'अभ्यासपुस्तकम्' अपि अत्र यथास्वरूपं मुद्रापितमस्ति। तदर्थं शिक्षामण्डलपक्षतः विश्वासाय कृतज्ञतां ज्ञापयावः। पुस्तकमिदं शिक्षकाणां शिक्षार्थिनाञ्च करकमलयोः समर्पयन्तौ वाञ्छावः यदनेन तेषां कश्चनापि उपकारः भवति चेत् कृतार्थौ आत्मानौ मंस्यावहे। अत्र पुस्तके मुद्रणजाताः दृष्टिदोषजन्याः प्रमादजाश्च अशुद्धयः अपि सम्भवाः, ताः मानवस्वभावजाः इति मत्वा क्षन्तव्याः बुधैः, सूचनीयाश्च आगामिन्यवसरे अपाकर्तुमिति।

**विद्वद्विधेयौ**

डॉ. महावीरप्रसाद सारस्वतः
डॉ. राजेन्द्रप्रसाद भट्टः

# संस्कृतम् ( व्याकरणम् ) : प्रथम पत्रम्
## (प्रवेशिका परीक्षा)
### ( व्याकरण-शास्त्रम् )

पूर्णाङ्काः 100

| बिन्दवः | विषय-वस्तु | अङ्काः |
|---|---|---|
| 1 | व्याकरणशास्त्रस्य परिचयः, अध्ययनस्य उद्देश्यम्, प्रमुखाः वैयाकरणाः तेषां कृतयश्च। पाणिनिः, कात्यायनः, पतञ्जलिः। | 4 |
| 2 | सूत्रस्य लक्षणं तद्भेदाश्च, व्याख्यानस्य लक्षणं तद्भेदाश्च। | 4 |
| 3 | व्याकरणशास्त्रस्य पारिभाषिक-शब्दाः- उपदेशः, आगमः, आदेशः, लकारः, अनुनासिकः, अननुनासिकः, समासः, सन्धिः, उपधा, गणः। | 4 |
| 4 | लघुसिद्धान्त-कौमुदी (संज्ञा-प्रकरणम्) माहेश्वर-सूत्राणि, प्रत्याहारः, इत्-लोप-उदात्त-अनुदात्त-स्वरित-सवर्ण-प्रत्यय-संहिता-संयोग-पदसंज्ञानां ज्ञानम्, उच्चारणस्थानानि, आभ्यन्तर-बाह्य-प्रयत्नाः। | 8 |
| 5 | अच्संधिगत-प्रयोगसिद्धिः सूत्रार्थश्च। | 20 |
| 6 | हल्संधिगत-प्रयोगसिद्धिः सूत्रार्थश्च। | 15 |
| 7 | विसर्गसंधिगत-प्रयोगसिद्धिः सूत्रार्थश्च। | 5 |
| 8 | कारक-प्रकरणम् निर्धारितसूत्राणि ( अष्टाविंशतिः) | 15 |

(1) प्रातिपदिकार्थ-लिङ्ग-परिमाण-वचनमात्रे प्रथमा
(2) सम्बोधने च
(3) कर्तुरीप्सिततमं कर्म
(4) कर्मणि द्वितीया
(5) अकथितं च
(6) अधिशीङ्स्थासां कर्म
(7) उपान्वध्याङ्वसः
(8) लक्षणेत्थम्भूताख्यान-भाग-वीप्सासु प्रतिपर्यनवः
(9) कालाध्वनोरत्यन्तसंयोगे
(10) साधकतमं करणम्
(11) कर्तृकरणयोस्तृतीया
(12) सह-युक्तेऽप्रधाने
(13) येनाङ्गविकारः
(14) इत्थंभूतलक्षणे
(15) हेतौ
(16) कर्मणा यमभिप्रैति स सम्प्रदानम्
(17) चतुर्थी सम्प्रदाने
(18) वा. तादर्थ्ये चतुर्थी वाच्या
(19) नमः स्वस्ति-स्वाहास्वधाऽलंवषड्योगाच्च
(20) ध्रुवमपायेऽपादानम्

(21) अपादाने पञ्चमी
(22) जनिकर्तुः प्रकृतिः
(23) षष्ठी शेषे
(24) कर्तृकर्मणोः कृति
(25) आधारोऽधिकरणम्
(26) सप्तम्यधिकरणे च
(27) षष्ठी चानादरे
(28) यतश्च निर्धारणम्

| | | |
|---|---|---|
| 9 | अभ्यासपुस्तकम्–सम्भाषणाय विविधाव्ययादिशब्दानां ज्ञानम् | 25 |

**निर्धारित पुस्तकम् – व्याकरण कौमुदी ( प्रथमो भागः )**

# विषय–सूची


| | | |
|---|---|---|
| 1. | विषयप्रवेशः | 1–7 |
| 2. | संज्ञाप्रकरणम् | 9–18 |
| 3. | अच्सन्धिः | 19–40 |
| 4. | हल्सन्धिः | 41–58 |
| 5. | विसर्गसन्धिः | 59–66 |
| 6. | प्रयोगार्थाः | 67–71 |
| 7. | कारकप्रकरणम् | 72–88 |
| 8. | अभ्यासपुस्तकम् | 89–157 |
| 9. | कठिनशब्दानाम् अर्थाः | 158–159 |